# Shri Indrakshi Kavacham

# શ્રી ઇન્દ્રાક્ષીકવચમ્

## Document Information

Text title : Indrakshi Kavacham

File name : indrAkShIkavacham.itx

Category : devii, otherforms, devI, kavacha

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan Iyer, PSA Easwaran

Latest update : February 22, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2022

*sanskritdocuments.org*

# શ્રી ઇન્દ્રાક્ષીકવચમ્

ૐ શ્રીગણેશાય નમઃ ।
દેવ્યુવાચ -
ભગવાન્ દેવદેવશ લોકેશ્વર જગત્પતે ।
ઇન્દ્રાક્ષ્યાઃ કવચં બ્રૂહિ સર્વતત્ત્વનિરૂપિણમ્ ॥ ૧॥

શ્રીભૈરવ ઉવાચ
ઇન્દ્રાક્ષ્યાઃ કવચં પુણ્યં સર્વતત્ત્વનિરૂપિણમ્ ।
જગચ્ચિન્તામણિં નામ સર્વમન્ત્રૈકસાધનમ્ ॥ ૨॥

યં ધૃત્વા કવચં બ્રહ્માવિષ્ણુર્ભીમા શચીપતિઃ ।
યમોઽપિ વરુણશ્ચૈવ કુબેરશ્ચ દિગીશ્વરઃ ॥ ૩॥

બ્રહ્મા સૃજતિ વિશ્વં ચ વિષ્ણુર્દૈત્યનિષૂદનઃ ।
શિવઃ સંહરતે વિશ્વં જિષ્ણુઃ સુમનસાં પતિઃ ॥ ૪॥

દિગીશ્વરાશ્ચ દિક્પાલા યથાવદનુ ભૂતલે ।
જગચ્ચિન્તામણિં વશ્યે ભોગમોક્ષૈકસાધનમ્ ॥ ૫॥

સર્વવિદ્યામયં બ્રહ્મવિદ્યાનિધિમનુત્તમમ્ ।
જગચ્ચિન્તામણે દેવિ કવચસ્યાસ્ય કીર્તિતઃ ॥ ૬॥

દેવીન્દ્રાક્ષી પરા પ્રોક્તા હ્રીં બીજં શક્તિની સ્મૃતા ।
કીલકં પ્રણવઃ પ્રોક્તસ્ત્રિવર્ગફલસાધને ॥ ૭॥

અસ્ય શ્રી ઇન્દ્રાક્ષીકવચસ્ય પુરન્દરઋષિઃ, બૃહતીચ્છન્દઃ, ઇન્દ્રાક્ષી દેવતા ।
હ્રીં બીજં, શ્રીં શક્તિઃ, પ્રણવઃ કીલકમ્ ।
ત્રિવર્ગફલસાધને વિનિયોગઃ ।
ૐ હ્રીં શ્રીં વજ્રહસ્તા મે શિરો રક્ષતુ સર્વદા ।
ઐં સૌઃ ક્લીં પાતુ મે ભાલં વજ્રિણી વજ્રિસેવિતા ॥ ૧॥

ફટ્ સ્વાહા વજ્રહસ્તા ચ પાતુ નેત્રે મમાનિશમ્ ।

ૐ હ્રાં કર્ણૌ સદા પાતુ ૐ શ્રાં ગણ્ડૌ સદાવતુ ॥ ૨॥

ૐ ૐ મે નાસિકા પાતુ પરમા પરમેશ્વરી ।
ૐ ઐં મુખં ચ મે પાતુ વીરધીરૈકસુન્દરી ॥ ૩॥

ૐ ક્લીં જિહ્વાં સદા રક્ષેદ્દેવતા શશિસુન્દરી ।
ૐ ક્લાં કણ્ઠં મમાવ્યાદ્વૈ દેવતા સૂર્યસુન્દરી ॥ ૪॥

ૐ સઃ સ્કન્ધૌ સદા પાતુ દેવી શ્રીવહ્નિસુન્દરી ।
ૐ ઐં હ્રં મે ઉરઃ પાતુ દેવતા ઋક્ષસુન્દરી ॥ ૫॥

ૐ ઐં શ્રીં મે સ્તનૌ પાતુ દેવી કુલિશસુન્દરી ।
ૐ શ્રીં હ્રીં મેઽવતાત્પાર્શ્વે દેવી શ્રીતિથિસુન્દરી ॥ ૬॥

ૐ હ્રાં સૌઃ મેઽવતાત્કુક્ષિં દેવી શ્રીયોગસુન્દરી ।
ૐ શ્રીં હ્રૌં પાતુ મે નાભિં દેવતા પાશસુન્દરી ॥ ૭॥

ૐ શ્રીં મે પાતુ જઠરં દેવી કમલસુન્દરી ।
ૐ હ્રૂં ક્રીં પાતુ મે બાહૂ દેવી ખટ્વાઙ્ગસુન્દરી ॥ ૮॥

ૐ હ્રાં શ્રીં પાતુ મે હસ્તૌ દેવી માર્ગણસુન્દરી ।
ૐ ક્રાં હ્રાં પાતુ મે પૃષ્ઠં દેવી ભદ્રાઙ્ગસુન્દરી ॥ ૯॥

ૐ હ્રીં સૌઃ પાતુ મે વસ્તિં દેવી પઞ્ચાસ્યસુન્દરી ।
ૐ શ્રૂં હ્રાં ક્રીં કટિં પાતુ દેવતા ટઙ્કસુન્દરી ॥ ૧૦॥

ૐ શ્રીં સ્રીં પાતુ મેશિશ્નં દેવી પીતનસુન્દરી ।
ૐ હ્રીં હ્રૂં મેઽવતાદ્ગુહ્યં દેવી પાતાલસુન્દરી ॥ ૧૧॥

ૐ શ્રીં ક્લૌં પાતુ મામૂરૂ દેવી બ્રાહ્મણસુન્દરી ।
ૐ ઐં સ્તૌઃ મે રક્ષેજ્જાનુની દેવી બ્રહ્મસુન્દરી ॥ ૧૨॥

ૐ શ્રીંવૈ પાતુ મે જઙ્ઘે દેવતા વિષ્ણુસુન્દરી ।
ૐ સ્રાં હ્રાં ઐં સદાઽવ્યાન્મે ગુલ્ફૌ ગીર્વાણાસુન્દરી ॥ ૧૩॥

ૐ હ્રીં શ્રીં પાતુ મે પાદૌ દેવતા શિવસુન્દરી ।
ૐ સ્રીં હ્રૂં પાતુ મે પૂર્વે દેવતા યક્ષસુન્દરી ॥ ૧૪॥

ૐ જું સઃ પાતુ મે વહ્નૌ દેવતા દૈત્યસુન્દરી ।
ૐ ઐં ક્લીં પાતુ મે દક્ષે દેવતા પ્રેતસુન્દરી ॥ ૧૫॥

ૐ શ્રાં પાતુ મે નૈરૃત્યાં દેવી રક્ષસસુન્દરી ।
ૐ શ્રીં માં પાતુ વારુણ્યાં દેવી વરુણસુન્દરી ॥ ૧૬॥

ૐ ક્ષ્રૌં હૂં પાતુ વાયવ્યં દેવતા વાયુસુન્દરી ।
ૐ હૂં પાતુ કૌવીર્યાં દેવી પિશાચસુન્દરી ॥ ૧૭॥

ૐ હ્રીં શ્રીં પાતુ મામીશે દેવતેશાનસુન્દરી ।
ૐ ઐં હું પાતુ મામૂર્ધ્વે દેવી ગગનસુન્દરી ॥ ૧૮॥

ૐ હ્રીં અધસ્તાન્મે માયાદેવી પન્નગસુન્દરી ।
ૐ ૐ હ્રીં મે પ્રભતેઽવ્યાદ્દેવી બ્રહ્માણ્ડસુન્દરી ॥ ૧૯॥

ૐ ક્ષ્રૌં ક્લીં પાતુ માં રાત્રૌ દેવી ત્રૈલોક્યસુન્દરી ।
ૐ ક્લિં પાતુ નિશીથે માં દેવી શ્રીકામસુન્દરી ॥ ૨૦॥

ૐ હ્રાં કૂં માં નિશાન્તેઽવ્યાદ્દેવતા લોકસુન્દરી ।
સર્વત્ર સર્વદા પાતુ દેવી માં રૂપસુન્દરી ॥ ૨૧॥

રણે રાજકુલે પૂજે વિવાદે રિપુસઙ્ગનિ ।
દાવાગ્ન્યરણ્યભીતૌ ચ પોતાવ્યૌ જુરરોગતઃ ॥ ૨૨॥

મહાવ્યાધિષુ માં પાતુ ઇન્દ્રાક્ષી ચેન્દ્રસુન્દરી ।
ૐ હ્રીં શ્રીં ઐં સૌઃ ક્લીં પાયાદિન્દ્રાક્ષી માં ભવામ્બુધેઃ ॥ ૨૩॥

શિરસઃ પાદપર્યન્તં પાદાદિમસ્તકાન્તકમ્ ।
ૐ હ્રીં શ્રીં સર્વભીતિભ્યઃ ઇન્દ્રાક્ષી પાતુ મે વપુઃ ॥ ૨૪॥

ફલશ્રુતિઃ -
ઇતીદં કવચં પુણ્યં સર્વવિદ્યાનિરૂપણમ્ ।
જગચ્ચિન્તામણિં નામ ત્રિષુ લોકેશુ દુર્લભમ્ ॥ ૧॥

સર્વતત્ત્વમયં દિવ્યં સર્વતન્ત્રૈકરૂપિણમ્ ।
સર્વાગમમયં તત્ત્વં ગોપ્તવ્યં પશુસઙ્કટે ॥ ૨॥

અર્ધરાત્રૌ ચ મધ્યાહ્ને રવૌ કુઙ્કુમકેન ચ ।
ભૂર્જત્વચિ લિખેદ્ધર્મ ધારયેન્મૂર્ધ્નિ વા ભુજે ॥ ૩॥

રણે સર્વાન્ રિપૂન્ જિત્વા કલ્યાણી ગૃહમાવિશેત્ ।
વન્ધ્યા વામભુજે ધૃત્વા ઋતુસ્નાત્વાહ્નિ પઞ્ચમે ॥ ૪॥

ધૃત્વાઽચિરેણ કાલેન લભતે તનયાન્ બહૂન્ ।

જ્વરાદયશ્ચ યે રોગાઃ સન્નિપાતાદિકુષ્ઠકાઃ ॥ ૫॥

વિદ્રવન્તિ ભયત્રસ્તાઃ કવચસ્યાસ્ય ધારણાત્ ।
સપ્તજન્માર્જિતં પાપં દહત્યગ્નિરિવેન્ધનમ્ ॥ ૬॥

ઇન્દ્રપ્રભૃતયો દેવાઃ કામક્રોધાદયોઽરયઃ ।
જીવાદયશ્ચ ગુરવઃ શુક્રાદ્યાઃ કવયસ્તથા ॥ ૭॥

ભૂપપ્રભૃતયો મર્ત્યા વશ્યમેષ્યન્તિ વર્મણઃ ।
ધારણાત્પઠનાત્સત્યં સર્વવિદ્યેશ્વરો ભવેત્ ॥ ૮॥

ધનવાન્પુત્રવાન્ શ્રીમાન્પઠનાત્સાધકો ભવેત્ ।
ઇતીદં કવચં ગુહ્યં ગુહ્યાદ્ગુહ્યતરં પરમ્ ॥ ૯॥

જગચ્ચિન્તામણિં નામ ગોપ્તવ્યં ચ દુરાત્મભ્યઃ ।
ઇન્દ્રાક્ષ્યાઃ સર્વસર્વસ્વં સારાત્સારોત્તમોત્તમમ્ ।
અદાતવ્યમવક્તવ્યમિત્યાજ્ઞાપરમેશ્વરિ ॥ ૧૦॥

॥ ઇતિ શ્રીરુદ્રયામલે તન્ત્રે ઇન્દ્રાક્ષીકવચં સમાપ્તમ્ ॥

॥ શુભમસ્તુ ॥

Encoded by Sivakumar Thyagarajan Iyer
Proofread by Sivakumar Thyagarajan Iyer, Psa Easwaran psaeaswaran

*Shri Indrakshi Kavacham*
pdf was typeset on January 14, 2022

Please send corrections to *sanskrit@cheerful.com*